हि० अनु.—इस प्रकार चित्रग्रीव के द्वारा कह कर समझाए गए वे कबूतर महिलाराप्य नगर में हिरण्यक के बिल रूपी किले पर पहुंचे। हिरण्यक भी हजार मुख (छिद्र) वाले बिल रूपी किले में प्रविष्ट हो निर्भय होकर सुख से रहता था। क्यों न ऐसा हो क्यों कि यह ठीक ही कहा जाता है—

न गजाना सहस्रेण न च लक्षेण वाजिनाम् ।
तत्कर्म सिध्यते राज्ञा दुर्गेणैकेन यद्रणे ॥१५॥

अन्वय —रणे राज्ञा यत् कर्म एकेन दुर्गेण सिध्यते तत् गजाना सहस्रेण न (सिध्यते) न च वाजिनाम् लक्षेण (सिध्यते) ।

स० टी० —रणे युद्ध राज्ञा नृपाणा यत् कर्म कार्यम् एकेन केवलेन दुर्गेण सिध्यते निष्पद्यते तत् कर्म गजाना हस्तिना सहस्रेण न सिध्यते न च वाजिनाम् अश्वानां लक्षेण सिध्यते ।

व्या० —सिध्यते=कर्तृवाच्य म 'सिध्' धातु का शुद्ध प्रयोग 'सिध्यति' होता है, अत यह कर्मकर्तृ प्रयोग मानना होगा—'सिध्' (सिध्) धातु, कर्म-कर्तृ लट्, प्र० पु०, एक० ।

हि० अनु० —युद्ध मे राजाओ का जो काम केवल एक दुर्ग से सिद्ध होता है, वह न तो हजारो हाथियो से सिद्ध होता है और न लाखो घोडो से सिद्ध होता है ।

शतमेकोऽपि सधत्ते प्राकारस्थो धनुर्धर ।
तस्माद् दुर्ग प्रशसन्ति नीतिशास्त्रविदो जना ॥१७॥

अन्वय —प्राकारस्थ एक अपि धनुर्धर शतम् संधत्ते, तस्माद् नीति-शास्त्रविद जनाः दुर्गम् प्रशसन्ति ।

सं० टी० —प्राकारस्थ दुर्गस्थित एक अपि धनुर्धर धनुर्धारी शतम् शतसख्याकान् जनान् सधत्ते विध्यति, तस्माद् अत एव नीतिशास्त्रविद नीति-शास्त्रवेत्तार जना दुर्गम् प्राकार प्रशसन्ति श्लाघयन्ति ।

समास —प्राकारस्थ =प्राकारे तिष्ठति (उपपदतत्पु०) धनुर्धर =धरतीति धर (कृदन्त), धनुष धर (तत्पु०) । नीतिशास्त्रविद =नीतिशास्त्र विदन्ति (उपपदतत्पु०) ।

व्या० —प्राकारस्थ =प्राकार+स्था+क (अ), धातु के 'आ' का लोप । धनुर्धर =धनुष्+धृ+अच् (अ), धातु की 'ऋ' को 'अर्' गुण । सधत्ते=

'सम्' पूर्वक 'धा' धातु, लट्, प्र० पु०, एकव०। नीतिशास्त्रविद = नीतिशास्त्र+विद्+क्विप् (×)[१]।

शब्दार्थ —प्राकारस्य =परकोटे मे स्थित (दुर्गस्थित)। सधत्त =सधान करता है, बेधता है।

हि० अनु०—परकोटे के भीतर दुर्ग मे स्थित एक भी धनुधर सैंकडो व्यक्तियो को (बाण) से बेध देता है। इसलिए नीतिशास्त्रज्ञ जन दुग की प्रशसा करते हैं।

अथ चित्रग्रीवो बिलमासाद्य तारस्वरेण प्रोवाच—'भो भो मित्र हिरण्यक, सत्वरमागच्छ। महती मे व्यसनावस्था वतते, तच्छ्रुत्वा हिरण्यकोऽपि बिलदुर्गान्तर्गत सन् प्रोवाच—'भो, को भवान्। किमर्थमायात। कि कारणम् कीदृक्ते व्यसनावस्थानम्। तत्कथ्यताम् इति। तच्छ्रुत्वा चित्रग्रीव आह—'भो, चित्रग्रीवो नाम कपोतराजोऽहं ते सुहृत्। तत्सत्वरमागच्छ। गुरुतर प्रयोजनमस्ति।' तदाकर्ण्य पुलकिततनु प्रहृष्टात्मा स्थिरमनास्त्वरमाणो निष्क्रान्त। अथवा साध्विदमुच्यते।

समास—पुलकिततन् —पुलकिता तनु यस्य स (बहु०)। प्रहृष्टात्मा= प्रहृष्ट आत्मा यस्य स (बहु०)। स्थिरमना =स्थिर मन यस्य स (बहु०)।

व्या —आसाद्य=आ+चौरादिक णिजन्त 'पद्' (साद्)+क्त्वा (ल्यप्=य)। प्रोवाच— प्र' पूर्वक 'ब्रू' धातु, लिट् प्र० पु०, एक०। श्रुत्वा= श्रु+क्त्वा (त्वा)। कथ्यताम्='कथ्' धातु, भावकर्म, लोट्, प्र० पु०, एक०। आकर्ण्य=आ+कर्ण्+क्त्वा (ल्यप्=य),। प्रहृष्ट=प्र+हृष्+क्त (त)। त्वरमाण =त्वर+शप (अ)+युक् (म्)+शानच् (आन)। निष्क्रान्त = निस्+क्रम्+क्त (त)।

शब्दार्थ —तारस्वरेण=उच्च स्वर से। सत्वरम्=शीघ्र। व्यसनावस्था= सकट की दशा या हालत। बिलदुर्गान्तगत =बिल रूपी दुर्ग के भीतर स्थित। प्रोवाच=बोला। आयात =आए। व्यसनावस्थानम्=सकट दशा।

१—(×), यह चिन्ह इस बात का द्योतक है कि प्रत्यय के सभी अंशो का लोप हो जाता है अर्थात् उसका कोई अश अवशिष्ट नही रहता।

गुरुतरम्=बडा भारी, बहुत बडा। आकर्ण्य=सुनकर। पुलकिततनुः=पुलकित या रोमाञ्चित शरीर वाला। प्रहृष्टात्मा=प्रसन्नचित्त। स्थिरमनाः=शान्त मन वाला। त्वरमाणः=जल्दी करता हुआ। निष्क्रान्तः=निकला।

हि० अनु०:—इसके बाद चित्रग्रीव बिल पर पहुँच कर ऊँचे स्वर से बोला—'अरे ! मित्र हिरण्यक, शीघ्र आओ। मेरी बहुत बडी संकट की दशा है। यह सुन कर हिरण्यक भी बिल रूपी दुर्ग के भीतर स्थित हो बोला—'अरे' आप कौन हैं ? किस लिए आए हो ? क्या कारण है ? तुम्हारी संकट दशा कैसी है ? सो कहो। यह सुनकर चित्रग्रीव बोला—'अरे ! मैं तेरा मित्र चित्रग्रीव नाम कपोतराज हूँ।'सो शीघ्र आओ। बहुत बडा प्रयोजन है।' यह सुन कर वह पुलकित, प्रसन्नचित्त एवं शान्तमना हो जल्दी से निकला। क्यों न ऐसा हो क्योंकि यह ठीक कहा जाता है—

सुहृदः स्नेहसंपन्ना लोचनानन्ददायिनः।
गृहे गृहवतां नित्यमागच्छन्ति महात्मनाम् ॥१७॥

अन्वयः—स्नेहसंपन्नाः लोचनानन्ददायिनः सुहृदः महात्मनाम् गृहवताम् गृहे नित्यम् आगच्छन्ति।

सं० टी०:—स्नेहसंपन्नाः प्रेमयुक्ताः लोचनानन्ददायिनः नयनसुखदातारः सुहृदः सखायः महात्मनाम् महापुरुषाणाम् गृहवताम् गृहस्थानाम् गृहे सदने नित्यम् सर्वदा आगच्छन्ति शुभागमनम् कुर्वन्ति।

समासः—स्नेहसंपन्नाः=स्नेहेन संपन्नाः (तत्पु०)। लोचनानन्ददायिनः= लोचनाभ्याम् आनन्दम् ददति (उपपद तत्पु०)। महात्मनाम्=महान् आत्मा येषां तेषाम् (बहु०)।

व्याः०—संपन्नाः=सम्+पद्+क्त (त)। लोचनानन्ददायिनः= लोचनानन्द+दा+युक् (य्)+णिनि (इन्)। गृहवताम्=गृह+मतुप् (मत्), 'म' को 'व'।

शब्दार्थः—गृहवताम्=गृहस्थों के।

हि० अनु०—स्नेह से युक्त एवं नेत्रों को आनन्द देने वाले मित्र महात्मा गृहस्थों के घर में नित्य आते रहते हैं।

आदित्यस्योदयस्तात ताम्बूल भारती कथा।
इष्टा भार्या सुमित्र च अपूर्वाणि दिने दिने ॥१८॥

अन्वय —(स्पष्ट व सीधा है)।

स० टी० —हे तात आदित्यस्य सूर्यस्य उदय उद्गम ताम्बूल तदाख्य प्रसिद्ध पत्रम् भारती कथा महाभारतस्य कथा इष्टा प्रिया भार्या पत्नी सुमित्रम् सज्जन सखा दिने दिने प्रतिदिनम् सर्वदा इत्यर्थ. अपूर्वाण नवीनानि सन्तीति शेष ।

हि० अनु० —हे तात सूर्योदय, पान, महाभारत की कथा, प्रिया भार्या, अच्छा मित्र ये प्रतिदिन (सवदा) नवीन हो (अनुभूत होते हैं)।

सुहृदो भवने यस्य समागच्छन्ति नित्यश ।
चित्ते च तस्य सौख्यस्य न किंचित्प्रतिम सुखम् ॥१९॥

अन्वय —यस्य भवने नित्यश सुहृद समागच्छन्ति, तस्य चित्ते च (अनुभूयमानस्य) सौख्यस्य किंचित् सुखम् प्रतिमम् न (अस्ति)।

स० टी० —यस्य जनस्य भवने सदने नित्यश सवदा सुहृद मित्राणि समागच्छन्ति समागमन कुर्वन्ति, तस्य जनस्य चित्ते हृदये च अनुभूयमानस्य सौख्यस्य सुखस्य किंचित् अ यत् किमपि सुखम् प्रतिम उपमानम् सदृशमित्यर्थ न अस्ति ।

शब्दार्थ —प्रतिमम्=उपमान, सदृश ।

हि० अनु० —जिस व्यक्ति के घर मे सर्वदा सुहृद आते रहते है, उसके हृदय मे जो सुख अनुभूत होता है, उसके समान अन्य कोई सुख नहीं होता है।

अथ चित्रग्रीव सपरिवार पाशबद्धमालोक्य हिरण्यक सविषादमिदमाह—भो, किमेतत् । स आह—'भो, जानन्नपि किं पृच्छसि । उक्त च यत —

हि० अनु ०—तब चित्रग्रीव को सपरिवार जाल मे बँधा देखकर हिरण्यक दु ख के साथ यह बोला—'अरे ! यह क्या । वह (चित्रग्रीव) बोला— अरे ! जानते हुए भी क्या पूँछते हो, क्योंकि कहा भी है—

यस्माच्च येन च यदा च यथा च यच्च,
यावच्च यत्र च शुभाशुभमात्मकर्म,
तस्माच्च तेन च तदा च तथा च तच्च,
तावच्च तत्र च कृतान्तवशादुपैति ॥२०॥

अन्वय —(सीधा व स्पष्ट है)।

स० टी० —यस्मात् यस्माद्धेतो च येन येन जनेन च यदा यस्मिन् काले च येन प्रकारेण च यत् यद् विशिष्ट कर्म च यावत् यत्परिमाणक च यत्र यस्मिन् स्थाने च शुभाशुभ सदसत् आत्मकर्म स्वकीयं कर्म भवति, तस्मात् तस्मादेव हेतो च तेन तेनैव जनेन च तदा तस्मिन्नेव काले च तथा तेनैव प्रकारेण च तत् तदनुरूपमेव च फलम् तावत् तत्परिमाणकमेव च तत्र तस्मिन्नेव स्थाने च कृतान्तवशात् फलदातृयमवशाद् उपैति प्राप्नोति।

समास —शुभाशुभम्=शुभ च अशुभ च, अनयो समाहार (समाहार द्वन्द्व)। आत्मकर्म=आत्मन कर्म (तत्पु०)।

व्या० —उपैति='उप' पूर्वक 'इण्' (इ) धातु, लट्, प्र० पु०, एक०।

शब्दार्थ —कृतान्तवशात्=फलदाता यम के वश (नियन्त्रण) से।

हि० अनु० —जिस हेतु से, जिस व्यक्ति के द्वारा या सग से, जब, जिस प्रकार जो, जितना और जहाँ अपना शुभ या अशुभ कर्म होता है, उसी हेतु से, उसी व्यक्ति के द्वारा या सग से, तभी, उसी प्रकार, वही, उतना ही, और वहीं (जीव) फलदाता यम के नियन्त्रण से फल प्राप्त करता है।

तत्प्राप्त मयैतद्बन्धन जिह्वालौल्यात्। सांप्रत त्व सत्वर पाशविमोक्ष कुरु।' तदाकर्ण्य हिरण्यक प्राह—

हि० अनु० —सो मैंने यह बन्धन जिह्वा की चपलता के कारण प्राप्त किया है। अब तुम शीघ्र ही पाशमोचन करो अर्थात् बन्धन से छुटकारा दिलाओ।' यह सुन कर हिरण्यक बोला—

अर्धार्धाद्योजनशतादामिष वीक्षते खग।
सोऽपि पार्श्वस्थित दैवाद् बन्धन न च पश्यति ॥२१॥

अन्वय —खग अर्धार्धात् योजनशतात् आमिषम् वीक्षते, स अपि दैवात् पार्श्वस्थितम् बन्धनम् न पश्यति।

स० टी० —खग पक्षी अर्धार्धाद् अर्धाद् अर्धाद् अर्धस्य अर्धात् चतुर्थांशाद् वा योजनशतात् क्रोशचतुशतकाद् आमिषम् मासम् वीक्षते पश्यति स एतादृश पक्षी अपि दैवाद् दैवयोगाद् भाग्यवशात् पार्श्वस्थितम् समीपवर्ति बन्धनम् न पश्यति अवलोकते ।

समास —अर्धार्धात्=अधमअर्धम् तस्मात, अथवा—अधस्य अधम् तस्मात् (तत्पु०) । योजनशतात्=योजनानाम् शतम् तस्मात् (तत्पु०) । पार्श्वस्थितम्=पार्श्वे स्थितम् (तत्पु०) ।

व्या —वीक्षते='वि' पूर्वक 'ईक्ष्' धातु, लट, प्र० प० एक० ।

शब्दार्थ —अर्धार्धात्=आधे आधे से अथवा—आधे के आधे अर्थात् चतुर्थांश से । आमिषम्=मास । वीक्षते=देख लेता है । पार्श्वस्थितम्=पास मे स्थित । योजनशतात्=सौ योजन अर्थात् चार सौ कोस मे ।

हि० अनु० —पक्षी आधे आधे अथवा चतुर्थांश योजन शत (पचास या पच्चीस योजन) मे मास देख लेता है, किन्तु वह भी दैवयोग से पास मे स्थित अपने बन्धन को नही देख पाता है ।

तथा च ।

हि० अनु० —और भी ।

रविनिशाकरयोर्ग्रहपीडनम्,
गजभुजङ्गविहङ्गमबन्धनम् ।
मतिमतां च निरीक्ष्य दरिद्रताम्,
विधिरहो बलवानिति मे मति ॥२२॥

अन्वय —रविनिशाकरयो ग्रहपीडनम् गजभुजङ्गविहङ्गमबन्धनम् मतिमताम् दरिद्रताम् च निरीक्ष्य अहो विधि बलवान् इति मे मति (भवति) ।

स० टी० —रविनिशाकरयो सूर्यचन्द्रयो ग्रहपीडनम् राहुकेतुप्रभृतिभि ग्रहै ग्रहणम् गजभुजङ्गविहङ्गमबन्धनम् हस्तिना सर्पाणा पक्षिणा च नियन्त्रणम् मतिमताम् बुद्धिमताम् दारिद्रताम् धनहीनताम् विलोक्य दृष्टवा अहो विधि विधाता

भाग्य वा बलवान् प्रबल इति इत्थम् मे मम मनि बुद्धि धारणा वा भवतीति शेष ।

समास —रविनिशाकरयो =रविश्च निशाकरश्च तयो (द्वन्द्व)। ग्रहपीडनम् =ग्रहै पीडनम् (तत्पु०)। गजभुजङ्गविहगमबन्धनम्=गजाश्च विहङ्गमाश्च (द्वन्द्व), तेषा बन्धनम् (तत्पु०)।

व्या०—पीडनम्=पीड्+ल्युट् (यु=अन)। बन्धनम्=बन्ध्+ल्युट् (यु=अन)। मतिमताम् मति+मतुप् (मत्)। निरीक्ष्य=निर्+ईक्ष्+क्त्वा (ल्यप्=य) दरिद्रताम्=दरिद्र+तल् (त)+टाप् (आ)। बलवान्=बल+मतुप् (मत्=वत्)। मे='मम' का वैकल्पिक रूप।

शब्दार्थ —निरीक्ष्य=देख कर।

हि० अनु०.—सूर्य और चन्द्र का अन्य ग्रहों के द्वारा ग्रहण रूप पीडन, हाथी, सर्प एव पक्षियो का बन्धन और बुद्धिमानो की दरिद्रता देखकर विधि ही बलवान् है, ऐसी मेरी धारणा होती है।

तथा च।

हि० अनु०—और भी।

> व्योमैकान्तविचारिणोऽपि विहगा सम्प्राप्नुवन्त्यापदम्,
> बध्यन्ते निपुणैरगाधसलिलान्मीना समुद्रादपि।
> दुर्णीत किमिहास्ति किं च सुकृत क स्थानलाभे गुण ,
> काल सर्वजनान् प्रसारितकरो गृह्णाति दूरादपि ॥२३॥

अन्वय—व्योमैकान्तविचारिण अपि विहगा आपदम् सम्प्राप्नुवन्ति, मीना निपुणै अगाधसलिलात् समुद्रात् अपि बध्यन्ते, इह किम् दुर्णीतम् अस्ति, किम् च सुकृतम् (अस्ति), स्थानलाभे क गुण (अस्ति), प्रसारितकर काल सर्वजनान् दूरात् अपि गृह्णाति।

स० टी०—व्योमैकान्तविचारिण आकाशस्य एकान्तप्रदेशे विचरण कुर्वन्त अपि विहगा पक्षिण आपदम् विपत्तिम् सम्प्राप्नुवन्ति लभन्ते, मीना मत्स्या निपुणै कुशलै जनै अगाधसलिलात् असीमजलात् समुद्रात् सागरात् अपि बध्यन्ते गृह्यन्ते, इह अस्मिन् जगति किम् दुर्णीतम् दुष्कृत विवेकहीनतया वा

कृत कार्यम्, किम् च सुकृतम् पुण्य समीचीनतया वा कृत कार्यम् अस्ति, स्थान-लाभे समुचितस्थानस्य पदस्य वा प्राप्तौ क गुण उपयोगिता (अस्ति), प्रसारितकर विस्तृताधिकार कालः समय मृत्युर्वा सर्वजनान् सकलान् प्राणिन. दूरात् विप्रकृष्टाद् अपि गृह्णाति ग्रहण करोति ।

समास —व्योमैकान्तविचारिण =व्योम्न एकान्तम् (तत्पु०), तस्मिन् विचरन्ति (उपपदतत्पु०) । प्रसारितकर =प्रसारिता करा यस्य सः (बहु०) ।

व्या —व्योमैकान्तविचारिण =व्योमैकान्त+वि+चर्+णिनि (इन्) । बध्यन्ते='बन्ध्' धातु, कर्मवाच्य, लट्, प्र० पु०, बहुव० । दुर्णीतम्=दुर्+नी+क्त (त) । सुकृतम्=सु+कृ+क्त (त) ।

शब्दार्थ —व्योमैकान्तविचारिण =आकाश के एकान्त प्रदेश मे विचरण करने वाले । बध्यन्ते=बाँधे जाते हैं, पकड़े जाते हैं । दुर्णीतम्=बुरा कार्य, नीति के विपरीत कार्य । सुकृतम्=अच्छा कार्य, नीति के अनुकूल काय । प्रसारितकर =फैलाए हुए हाथो वाला ।

हि० अनु० —आकाश के एकान्त प्रदेश मे विचरण करने वाले भी पक्षी सकट प्राप्त करते हैं, मत्स्य (मच्छ) कुशल व्यक्तियो के द्वारा अथाह जल वाले समुद्र से भी पकड लिए जाते हैं । (वस्तुत) इस जगत् मे कौनसा कार्य नीति के विपरीत और कौनसा रीति के अनुकूल है तथा समुचित स्थान या पद की प्राप्ति म भी क्या लाभ है (क्योकि) फैलाए हुए हाथों वाला काल सभी प्राणियो को दूर से भी पकड लेता है ।

एवमुक्त्वा चित्रग्रीवस्य पाश छेत्तुमुद्यत स तमाह—'भद्र, मा मैवं कुरु । प्रथम मम भृत्याना पाशच्छेद कुरु । तदनु ममापि च ।' तच्छ्रुत्वा कुपितो हिरण्यक प्राह—'भो , न युक्तमुक्त भवता । यत स्वामिनोऽनन्तर भृत्या ।' स आह—भद्र, मा मैव वद । मदाश्रया सर्व एते वराका । अपर स्वकुटुम्ब परित्यज्य समागता । तत्कथमेतावन्मात्रमपि समान न करोमि । उक्त च—

व्या० —छेत्तुम्=छिदिर (छिद्)+तुमुन (तुम्) । उक्तम्=ब्रू (वच्)+क्त (त), धातु के 'व्' को 'उ' सम्प्रसारण । परित्यज्य=परि+त्यज्+क्त्वा (ल्यप्=य) ।

शब्दार्थ.—छेत्तुम्=काटने को। उद्यतम्=तैय्यार। वराका.=बेचारे। परित्यज्य=छोड़कर। एतावन्मात्रम्=केवल इतना।

हि॰ अनु॰—ऐसा कहकर चित्रग्रीव के बन्धन को काटने के लिए प्रस्तुत उस (चूहे) से वह (चित्रग्रीव) बोला—'भाई ऐसा मत करो। पहले मेरे भृत्यो (सेवकों, अनुयायियो) का जाल काटो, उसके बाद मेरा भी (काटना)। यह सुनकर क्रुद्ध हो हिरण्यक बोला—'अरे! आपने ठीक नहीं कहा, क्योंकि स्वामी के बाद ही भृत्य (आते हैं)।' वह बोला—'भाई, ऐसा मत कहो। ये सब बेचारे मेरे आश्रित हैं। दूसरे, अपने कुटुम्ब को छोड़कर (मेरे साथ) आए हैं। तो क्या मैं केवल इतना भी (इनका) समान न करूँ। कहा भी है—

य समान सदा धत्ते भृत्यानां क्षितिपोऽधिकम्।
वित्ताभावेऽपि त दृष्ट्वा ते त्यजन्ति न कर्हिचित् ॥२४॥

अन्वय—य क्षितिप सदा भृत्यानाम् अधिकम् समानम् धत्ते, तम् वित्ता-भावे अपि दृष्ट्वा ते कर्हिचित् न त्यजन्ति।

सं॰ टी॰—य क्षितिप भूमिपाल सदा सर्वदा भृत्यानाम् सेवकानाम् अधिकम् पर्याप्तम् समानम् समादरम् धत्ते धारयति करोति इत्यर्थ, तम् एतादृशम् राजानम् वित्ताभावे धनाभावे अपि दृष्ट्वा अवलोक्य ते भृत्याः कर्हिचित् कदाचित् न त्यजन्ति परित्यागं कुर्वन्ति।

व्या॰—धत्ते='धा' धातु, आत्मनेपद, लट्, प्र॰ पु॰, एक॰। क्षितिपः= क्षिति+पा+क (अ), धातु के 'आ' का लोप।

शब्दार्थ—धत्ते=धारण करता है, करता है। क्षितिप=राजा। वित्ताभावे=धन के अभाव मे।

हि॰ अनु॰—जो राजा सर्वदा सेवकों का अधिक समान करता है, उसको धन के अभाव की दशा मे भी देखकर वे कभी नही छोड़ते हैं।

तथा च।

हि॰ अनु॰—और भी।

विश्वासः सपदां मूल तेन यूथपतिर्गज।
सिंहो मृगाधिपत्येऽपि न मृगैः परिवार्यते ॥२५॥

अन्वय —विश्वास सपदाम् मूलम् (अस्ति), तेन गज यूथपति (भवति), सिंह मृगाधिपत्ये अपि मृगै न परिवार्यते ।

स० टी० —विश्वास विस्रम्भ सपदाम् सपत्तीनाम् मूल कारणम् अस्ति तेन विश्वासेन गज हस्ती यूथपति स्मूहाधिपति भवति सिंह मृगेन्द्र मृगाधिपत्ये मृगराजत्वे अपि मृगै पशुभि न परिवार्यते परिवृतो भवति ।

समास —यूथपति=यूथस्य पति (तत्पु०) मृगाधिपत्ये=मृगाणाम् आधिपत्ये (तत्पु०) ।

व्या० —आधिपत्य=अधिपति+ष्यञ (य) शब्द के आदि स्वर अ को वृद्धि अतिम स्वर 'इ' का लोप । परिवार्यते=परि पूर्वक णिजन्त 'वृ (वार्) धातु कर्मवाच्य लट् प्र० पु०, एक० ।

शब्दार्थ —परिवार्यते=आसपास घेरा जाता है ।

हि० अनु० —विश्वास सपत्तियो का मूल है जिस (विश्वास) के कारण हाथी यूथपति (झुण्ड का मालिक) बन जाता है किन्तु सिंह पशुओ का राजा होने पर भी पशुओ के द्वारा नही घेरा जाता है (हाथी के विषय मे यह विश्वास है कि वह नही मारेगा, अत पशु घेरे रहते हैं और वह इस प्रकार यूथपति बन जाता है कि तु यत सिंह के विषय मे ऐसा विश्वास नही है, अत पशु उसे घेरते नही अपितु उससे दूर ही रहते हैं) ।

अपर मम कदाचित् पाशच्छेद कुर्वतस्ते द तभङ्गो भवति । अथवा दुरात्मा लुब्धक समभ्येति तन्नून मम नरकपात एव । उक्त च—

हि० अनु० —दूसरे मेरा बन्धन काटते हुए कदाचित् तुम्हारा दाँत भी टूट सकता है और यदि इतने म दुष्ट बहेलिया आगया तो निश्चय ही मेरा नरकपात (नरक मे गमन) होगा । कहा भी है—

सदाचारेषु भृत्येषु ससीदत्सु च य प्रभु ।
सुखी स्यान्नरक याति परत्रेह च सीदति ।।३६।।

अन्वय —(सीधा है) ।

स० टी० —सदाचारेषु सदाचारपरायणषु भृत्येषु सेवकेषु ससीदत्सु सकट

ग्रस्तेषु सत्सु य प्रभु स्वामी सुखी सुखित स्यात् स नरक निरय याति गच्छति। परत्र परलोक इह अस्मिन् लोके च सीदति दु खितो भवति।

व्या० —ससीदत्सु=सम्+षद्लृ (सद्=सीद)+शतृ (अत)।

शब्दार्थ —ससीदत्सु=दु खी या सकटग्रस्त होने पर।

हि० अनु० —सदाचारपरायण सेवको के दु खी होने पर जो स्वामी सुखी रहता है, वह नरक को जाता है और परलोक तथा इस लोक मे दु खी होता है।

तच्छ्रुत्वा प्रहृष्टो हिरण्यक प्राह—'भो, वेद्म्यहं राजधर्मम पर मया तव परीक्षा कृता। तत् सर्वेषा पूर्व पाशच्छेद करिष्यामि। भवानप्यनेन विधिना बहुकपोतपरिवारो भविष्यति। उक्त च—

हि० अनु० —यह सुनकर प्रसन्न हो हिरण्यक बोला—(अरे! मैं राजधर्म जानता हूँ। कि तु मैंने तेरी परीक्षा की थी। सो पहले अन्य सबका बन्धन काटूंगा, आप भी इस विधि से बहुत कबूतरों के परिवार वाले हो जाओगे। कहा भी हैं—

कारुण्य सविभागश्च यस्य भृत्येषु सर्वदा।
सभवेत्स महीपालस्त्रैलोक्यस्यापि रक्षणे ॥२७॥

अन्वय —यस्य भृत्येषु सर्वदा कारुण्यम् सविभाग च (भवति), स महीपाल त्रैलोक्यस्य अपि रक्षणे सभवेत।

स० टी० —यस्य राज्ञ भृत्येषु सर्वदा कारुण्यम करुणा सविभाग समविभाजन च भवति स महीपाल राजा त्रैलोक्यस्य लोकत्रयस्य अपि रक्षणे पालने सभवेत समर्थो भवेत्।

समास —त्रैलोक्यस्य=त्रयाणा लोकाना समाहार त्रिलोकम् (समाहार द्विगु), त्रिलोकमेव त्रैलोक्यम् (स्वाथ मे तद्धित 'ष्यञ्') तस्य।

व्या० —सविभाग =सम्+वि+भज्+घञ् (अ)। त्रैलोक्यस्य= त्रिलोक+ष्यञ् (य)।

शब्दार्थ —सविभाग =सम एव न्यायोचित विभाजन या वितरण।

हि० अनु० —जो राजा अपने सेवको पर करुणा तथा उनके बीच मे सम

एव न्यायोचित विभाजन या वितरण करता है, वह तीनो लोको के पालन म समथ होता है।

एवमुक्त्वा सर्वेषां पाशच्छेद कृत्वा हिरण्यकश्चित्रग्रीवमाह—'मित्र, गम्यतामधुना स्वाश्रय प्रति। भूयोऽपि व्यसने प्राप्ते समागन्तव्यम्।' इति तान् सम्प्रेष्य पुनरपि दुर्गं प्रविष्ट। चित्रग्रीवोऽपि सपरिवार स्वाश्रयमगमत्। अथवा साध्विदमुच्यते—

व्या० —गम्यताम्=गम्लृ (गम्) धातु, भावकर्मवाच्य, लोट्, प्र० पु०, एकव०। प्राप्ते=प्र+आप्लृ (आप्)+क्त (त)। समागन्तव्यम्=सम्+आ+गम्+तव्य। सम्प्रेष्य=सम्+प्रेष्ट (प्रेष्)+क्त्वा (ल्यप्=य)।

शब्दार्थ —भूय=फिर। व्यसने प्राप्ते=सकट के प्राप्त होने पर। समागन्तव्यम्=आना चाहिए। सप्रेष्य—भेजकर, पठा कर, विदाकर।

हि० अनु० —ऐसा कह कर सबका बन्धन काटकर हिरण्यक चित्रग्रीव से बोला—"मित्र, अब तुम अपने निवास-स्थान को जाओ। फिर भी सकट के प्राप्त होने पर तुम्हे चला आना चाहिए।' इस प्रकार उनको विदाकर फिर भी अपने दुर्ग (विल) मे घुस गया। चित्रग्रीव भी सपरिवार अपने आश्रय स्थान को चला गया। इसीलिए यह ठीक ही कहा जाता है—

मित्रवान् साधयत्यर्थान् दु साध्यानपि वै यत ।
तस्मान् मित्राणि कुर्वीत समानान्येव चात्मनः ॥२८॥

अन्वय —यत मित्रवान् दु साध्यान् अपि अर्थान् साधयति वै, तस्मात् च आत्मन समानानि एव मित्राणि कुर्वीत।

स० टी० —यत यस्मात् मित्रवान् मित्रयुक्तः जन दु साध्यान् दु खेन साधयितुम् शक्यान् अर्थान् कार्याणि साधयति साफल्येन निष्पादयति। तस्मात् ततश्च आत्मन स्वस्य समानानि सदृशानि एव न तु असमानानि इत्यर्थ मित्राणि सुहृद कुर्यात्।

व्या ०—मित्रवान्=मित्र+मतुप् (मत्=वत्)। दु साध्यान्=दुस्+साध्+ण्यत् (य)।

हि० अनु० —यत मित्रों से युक्त व्यक्ति कठिन (कठिनता से हो सकने वाले) कार्यों को भी सिद्ध कर लेता है, अत (प्रत्येक व्यक्ति) अपने समान ही (असमान नहीं) मित्र बनावे।

लघुपतनकोऽपि वायस सर्वं त चित्रग्रीवबन्धनमोक्षमवलोक्य विस्मितमना व्यचिन्तयत्—'अहो, बुद्धिरस्य हिरण्यकस्य शक्तिश्च दुर्गसामग्री च। तदीदृगेव विधिर्विहङ्गाना बन्धनमोक्षात्मक। अह च न कस्यचिद् विश्वसिमि चलप्रकृतिश्च। तथाप्येन मित्र करोमि। उक्त च—

समास —चित्रग्रीवबन्धनमोक्षम्=बन्धनम् च मोक्ष च तयो समाहार बन्धनमोक्षम् (समाहार द्वन्द्व), चित्रग्रीवस्य बन्धनमोक्षम् (तत्पु०)। विस्मितमना =विस्मितम् मन· यस्य स (बहु०)। बन्धनमोक्षात्मक =बन्धनस्य मोक्ष· (तत्पु०), स आत्मा यस्य स (बहु०) चलप्रकृति =चला प्रकृति यस्य स (बहु०)।

व्या० —अवलोक्य=अव+लोक्+क्त्वा (ल्यप्)। विश्वसिमि='वि + पूर्वक 'श्वस्' धातु, लट्, उ० पु०, एक०।

शब्दार्थ —चित्रग्रीवबन्धनमोक्षम्=चित्रग्रीव का बन्धन और छुटकारा। ईदृग् एव=ऐसा ही बन्धनमोक्षात्मक =जिसका स्वरूप बन्धन का मोक्ष है, बन्धन के मोक्ष का। विश्वसिमि=विश्वास करता हूँ। चपप्रकृति =चचल स्वभाव वाला।

हि० अनु० —लघुपतनक कौआ भी चित्रग्रीव के उस सब बन्धन और छुटकारे को देखकर चकित हो सोचने लगा—'अरे, इस हिरण्यक की बुद्धि, शक्ति और दुर्गसामग्री (बिल रूपी दुर्ग) कैसी (आश्चर्यजनक) है। अच्छा! पक्षियों के बन्धन के मोक्ष का ऐसा ही तरीका (होना चाहिए)। मैं तो किसी का विश्वास नहीं करता हूँ और चचल स्वभाव वाला हूँ, फिर भी इसको मित्र बनाऊँ, कहा भी है—

अपि सपूर्णतायुक्तै. कर्तव्याः सुहृदो बुधै.।
नदीशः परिपूर्णोऽपि चन्द्रोदयमपेक्षते ॥२६॥

अन्वय —सपूर्णतायुक्तै अपि बुधै सुहृद कर्त्तव्या, नदीश परिपूर्ण अपि चन्द्रोदयम् अपेक्षते।

सं० टी०:—संपूर्णतायुक्तैः=सर्वसम्पन्नतासमन्वितैः अपि बुधैः विज्ञैः सुहृदः सखायः कर्तव्याः विधेयाः, नदीशः समुद्रः परिपूर्णः सर्वविधपूर्णः अपि चन्द्रोदयम् चन्द्रस्य उदयम् अपेक्षते अपेक्षाम् करोति ।

समासः—सपूर्णतायुक्तैः—संपूर्णतया युक्ताः तैः (तत्पु०) नदीशः=नदीनाम् ईशः (तत्पु०) । चन्द्रोदयम्=चन्द्रस्य उदय तम् (तत्पु०) ।

व्या०:—कर्तव्याः=कृ+तव्य । बुधैः=बुध्+क (अ) । अपेक्षते='अप' पूर्वक 'ईक्ष्' धातु, लट्, प्र० पु०, एक० ।

हि० अनु०:—संपूर्णता (सर्वसम्पन्नता) से युक्त होने पर भी विज्ञ जनो (समझदार व्यक्तियो) को मित्र बनाने चाहिए (क्योकि) समुद्र परिपूर्ण होने पर भी चन्द्र के उदय की अपेक्षा (इच्छा) रखता है ।

विशेषः—यहां 'अर्थान्तरन्यास' अलकार है ।

एव सप्रधाय पादपादवतीर्य बिलद्वारमाश्रित्य चित्रग्रीवचच्छब्देन हिरण्यक समाहूतवान्—'एहि एहि भो हिरण्यक, एहि ।' तच्छब्द श्रुत्वा हिरण्यको व्यचिन्तयत्—'किमन्योऽपि कश्चित् कपोतो बन्धनशेषस्तिष्ठति येन मा व्याहरति ।' आह च—'भो., को भवानिति ।' स आह—'अहं लघुपतनको नाम वायस ।' तच्छ्रुत्वा विशेषादन्तर्लीनो हिरण्यक आह—'भो, द्रुत गम्यतामस्मात् स्थानात् ।' वायस आह—'अह तव पार्श्वे गुरुकार्येण समागत. । तत्कि न क्रियते मया सह दर्शनम् ।' हिरण्यक आह—'न मेऽस्ति त्वया सह सगमेन प्रयोजनम्' इति । स आह—भो, चित्रग्रीवस्य मया तव सकाशात्पाशमोक्षण दृष्टम् । तेन मम महती प्रीतिः सजाता । तत्कदाचिन्ममापि बन्धने जाते तव पार्श्वान्मुक्तिर्भविष्यति । तत्क्रियता मया सह मैत्री ।' हिरण्यक आह—'अहो, त्व भोक्ता । अह ते भोज्यभूत । तत्का त्वया सह मम मैत्री । तद्गम्यताम् । मैत्री विरोधभावात् कथम् । उक्त च—

समासः—बन्धनशेषः=बन्धनम् शेषः यस्य सः (बहु०) ।

व्या०:—संप्रधार्यः=सम्+प्र+णिजन्त 'धृ' (धार्)+क्त्वा (ल्यप्=य) । अवतीय=अव+तॄ+क्त्वा (ल्यप्=य) । आश्रित्य=आ+श्रि+तुक् (त्)+क्त्वा) ल्यप्=य) । समाहूतवान्=सम्+आ+ह्वे+क्तवतु (तवत्) ।

धातु के 'व्' को 'उ' सम्प्रसारण जिसे कि दीर्घ, 'ए' का पूर्वरूप। एहि=इण् (इ) धातु, लोट् प्र० पु०, एक०। व्यचिन्तयत्='वि' पूर्वक' चिति (चिन्त्) धातु, लङ्, प्र० पु०, एक०। व्याहरति='वि+आ 'पूर्वक 'हृ' धातु, लट्, प्र० पु०, एक०। समागतः=सम्+आ+गम्+क्त (त), धातु के 'म्' का लोप। क्रियते='कृ' धातु, कर्मवाच्य, लट्, प्र० पु०, एक०। दृष्टम्=दृश्+क्त (त), धातु के 'श्' को 'ष्'। संजाता=सम्+जन्+क्त (त)+टाप् (आ), धातु के 'न्' को 'आ'। भोक्ता=भुज्+तृच (तृ), धातु की उपधा 'उ' को 'ओ' गुण। भोज्य=भुज्+ण्यत् (य), धातु की उपधा 'उ' को 'ओ' गुण। मैत्री=मित्र+ष्यञ् (य), शब्द के आदि स्वर 'इ' को 'ऐ' वृद्धि, अन्तिम स्वर 'अ' का लोप=मैत्र्य+ङीप् (ई), 'य' का लोप।

शब्दार्थः—सम्प्रधार्य—विचार कर। समाहूतवान्=पुकारा, बुलाया। एहि=आओ। बन्धनशेषः=जिसका बन्धन (काटने को) अवशिष्ट (बाकी) रह गया है। व्याहरति=पुकारता है। विशेषात्=और अधिक। अन्तर्लीनः=भीतर छिपा हुआ। द्रुतम्=शीघ्र ही। गुरुकार्येण=बड़े या भारी काम से। मया सह दर्शनम्=मेरे साथ (मुझ से) साक्षात्कार (मुलाकात)। पार्श्वात्=पास से। भोक्ता=खाने वाला। भोज्यभूतः=खाद्य पदार्थ, भोजन।

हि० अनु०:—ऐसा विचार कर वृक्ष से उतर कर बिल के द्वार पर बैठ, चित्रग्रीव के समान शब्द से (कौए ने) हिरण्यक को पुकारा—'आओ-आओ, हे हिरण्यक आओ।' उस शब्द को सुनकर हिरण्यक सोचने लगा—'क्या कोई अन्य भी कबूतर ऐसा रह गया है, जिसका बन्धन (काटने से) अवशिष्ट रह गया हो, जिससे वह मुझे पुकारता है।' और बोला—'अरे! आप कौन हैं?' वह (कौआ) बोला—'मैं लघुपतनक नामक कौआ हूँ।' यह सुनकर और अधिक भीतर छिप कर हिरण्यक बोला—'अरे! शीघ्र ही इस स्थान से चले जाओ।' कौआ बोला—'मैं तेरे पास भारी कार्य से आया हूँ। तो फिर तुम मुझ से मुलाकात क्यों नहीं करते हो।' हिरण्यक बोला—'तुमसे मिलने से मुझे कोई प्रयोजन नहीं

है।' वह बोला—'देखो ! मैंने तुम्हारे द्वारा चित्रग्रीव के बन्धन का मोक्ष (छुटकारा) देखा है, इससे (तुम्हारे प्रति) मेरी बड़ी प्रीति हो गई है, क्योंकि कभी मेरा भी बन्धन होने पर तुम्हारे द्वारा (मेरा) छुटकारा हो सकेगा। अतः मेरे साथ मित्रता कीजिए। हिरण्यक बोला—'अरे ! तुम भोक्ता (खाने वाले) हो और मैं तुम्हारा भोज्य (खाद्य या भोजन) हूँ। सो तेरे साथ मेरी कैसी मित्रता ! अतः चले जाओ। विरोध होने के कारण मित्रता क्यो कर (हो सकती है)। कहा भी है—

> *ययोरेव समं वित्तं ययोरेव समं कुलम्।*
> *तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ॥३०॥*

अन्वय —(सीधा है)।

स० टी० —ययोः जनयोः एव समं समानं वित्तं धनं ययोः जनयोः एव समं कुलम् वंशः, तयोः जनयोः एव मैत्री मित्रता विवाहः विवाहसम्बन्धः च स्यात्, पुष्टविपुष्टयोः सबलदुर्बलयोः प्रबलाधिकप्रबलयोर्वा तु न स्यादिति शेषः।

समास —पुष्टविपुष्टयोः =पुष्टश्च विपुष्टश्च तयोः (द्वन्द्व)।

व्या० —पुष्ट=पुष्+क्त (त)। विपुष्ट=वि+पुष्+क्त (त)।

शब्दार्थ —पुष्टविपुष्टयोः =सबल और दुबल का, अथवा—प्रबल और अधिक प्रबल का।

हि० अनु० —जिन व्यक्तियो का समान धन और समान कुल हो, उन्ही की मित्रता और विवाह होना चाहिए, सबल और दुबल का या प्रबल और अधिक प्रबल का अर्थात् असमान व्यक्तियो का नही होना चाहिए।

तथा च।

हि० अनु० —और भी।

> **यो मित्रं कुरुते मूढ आत्मनोऽसदृशं कुधीः।**
> **हीनं वाप्यधिकं वापि हास्यतां यात्यसौ जनः ॥३१॥**

अन्वय —यः मूढः कुधीः आत्मनः असदृशम् हीनम् अधिकम् वा अपि मित्रम् कुरुते, असौ जनः हास्यताम् याति।

स६ टी० —य मूढ मूख कुधी दुर्बुद्धि आत्मन स्वस्य असदृशम् असमानम् हीनम् निकृष्टम् अधिकम् उत्कृष्टम् वा अपि मित्रम् सखायम् कुरुते विदधाति, असौ स जन पुरुष हास्यताम् उपहासपात्रताम् याति प्राप्नोति ।

समास —कुधी =कुत्सिता धी यस्य स (बहु०) ।

व्या —हास्यताम=हस्+ण्यत् (य), धातु की उपधा 'अ' को 'आ' वृद्धि ।

शब्दार्थ —कुधी =दुर्बुद्धि ।

हि० अनु० —जो मूख और दुर्बुद्धि व्यक्ति अपने असमान को, (अपने से) निकृष्ट या उत्कृष्ट को मित्र बनाता है, वह व्यक्ति उपहास का पात्र बनता है ।

तद्गम्यताम् इति । वायस आह—'भो हिरण्यक, एषोऽह तव दुर्गद्वार उपविष्ट । यदि त्व मैत्री न करोषि ततोऽह प्राणमोक्षण तवाग्र करिष्यामि, अथवा प्रायोपवेशन मे स्यात् इति । हिरण्यक आह—'भो ! त्वया वैरिणा सह कथ मैत्री करामि ।' उक्त च—

शब्दार्थ —प्रायोपवेशनम=उपवास, अनशन ।

हि० अनु० —सो जाओ ।' कौआ बोला—'हे हिरण्यक, यह मैं तेरे दुर्ग (बिल) के द्वार पर बैठा हूँ । यदि तू मित्रता नही करता है तो मैं तेरे आगे प्राण छोड दूँगा, अथवा मरा अनशन हो होगा ।' हिरण्यक बोला—'अरे ! तुझ शत्रु के साथ मैं कैसे मित्रता करूँ । कहा भी है —

वैरिणा न हि सदध्यात् सुश्लिष्टेनापि सधिना ।
सुतप्तमपि पानीय शमयत्येव पावकम् ॥३२॥

अन्वय —सुश्लिष्टेन अपि सधिना वैरिणा न हि सदध्यात्, (यतो हि) सुतप्तम् अपि पानीयम् पावकम् शमयति एव ।

स० टी० —सुश्लिष्टेन सम्यक् सघटितन सधिना सन्धिकार्येण अपि वैरिणा शत्रुणा न हि सदध्यात् मैत्रीभाव कुर्यात्, यतोहि सुतप्तम् अतीव तप्तम् अपि पानीयम् जलम् पावकम् अग्निम् शमयति शान्त करोति एव ।

समास —सुश्लिष्टेन=सुतराम् श्लिष्ट तन (तत्पु०) सुतप्तम्=सुतराम् तप्तम् (तत्पु०) ।

व्या —सुश्लिष्टेन=सु+श्लिष्+क्त (त)। सन्धिना=सम्+धा+कि (इ), धातु के 'आ' का लोप। सुतप्तम=सु+तप्+क्त (त)। सदध्यात्= 'सम्' पूर्वक 'धा' धातु, लिङ्, प्र० पु०, एक०।

शब्दार्थ —सुश्लिष्टेन=अच्छी तरह बाँधी हुई से।

हि० अनु० —अच्छी तरह बाँधी हुई सन्धि के द्वारा भी शत्रु के साथ समझौता (सुलह, मेल) न करे, (क्योंकि) खूब तपा हुआ जल भी अग्नि को बुझाता ही है।

विशेष —यहाँ 'अर्थान्तरन्यास' अलंकार है।

वायस आह—'भो, त्वया सह दर्शनमपि नास्ति कुतो वैरम्। तत्किमनुचितं वदसि।' हिरण्यक आह—'द्विविधं वैरं भवति। सहजं कृत्रिमं च। तत्सहजवैरी त्वमस्माकम्। उक्तं च—

हि० अनु० —कौआ बोला—'अरे! तेरे साथ साक्षात्कार भी नहीं हुआ, फिर वैर कैसे! सो क्यों अनुचित (बात) कहते हो।' हिरण्यक बोला—'वैर दो प्रकार का होता है—सहज या स्वाभाविक और कृत्रिम या बनाया हुआ। सो तू हमारा स्वाभाविक शत्रु है। कहा भी है—

कृत्रिमं नाशमभ्येति वैरं द्राक् कृत्रिमैर्गुणैः।
प्राणदानं विना वैरं सहजं याति न क्षयम् ॥३३॥

अन्वय —कृत्रिमम् वैरम् कृत्रिमैः गुणैः द्राक् नाशम् अभ्येति (किन्तु) सहजम् वैरम् प्राणदानम् विना क्षयम् न याति।

स० टी० —कृत्रिमम् क्रियया निर्वृत्तम् वैरम् शात्रवम् कृत्रिमैः क्रियया निर्वृत्तैः गुणैः नाशम् क्षयम् अभ्येति प्राप्नोति, किन्तु सहजम् सहजातं स्वाभाविकम् वैरं शत्रुता प्राणदानम् जीवनान्तम् विना क्षयम् नाशम् न याति गच्छति।

व्या —कृत्रिमम्=कृ+क्त्रि (त्रि)+मप् (म)।

शब्दार्थ —कृत्रिमम्=क्रिया से निष्पादित, बनाया हुआ, बनावटी। द्राक्=शीघ्र।

हि॰ अनु॰:—कृत्रिम वैर कृत्रिम (परोपकार आदि) गुणो से शीघ्र ही समाप्त हो जाता है, किन्तु सहज वैर जीवन के अन्त के बिना नष्ट नही होता।

वायस आह—'भोः द्विविधस्य वैरस्य लक्षणं श्रोतुमिच्छामि। तत्कथ्यताम्।' हिरण्यक आह—'भोः, कारणेन निर्वृत्तं कृत्रिमम्। तत्तदर्होपकारकरणाद् गच्छति। स्वाभाविकं पुनः कथमपि न गच्छति। तद्यथा—'नकुलसर्पाणाम्, शष्पभुङ्नखायुधानाम्, जलवह्न्योः, देवदैत्यानाम्, सारमेयमार्जाराणाम्, ईश्वरदरिद्राणाम्, सपत्नीनाम्, सिंहगजानाम्, लुब्धकहरिणानाम्, श्रोत्रियभ्रष्टक्रियाणाम्, मूर्खपण्डितानाम्, पतिव्रताकुलटानाम्, सज्जनदुर्जनानाम्। न कश्चित्केनापि व्यापादितः, तथापि प्राणान् संतापयन्ति।' वायस आह—भो! अकारणमेतत्। श्रूयतां मे वचनम्।

समासः—तदर्होपकारकरणात्=तस्य अर्हः तदर्हः (तत्पु॰), स च असौ उपकारः (कर्मधा॰), तस्य करणं तस्मात् (तत्पु॰)। नकुलसर्पाणाम्=नकुलाश्च सर्पाश्च तेषाम् (द्वन्द्व) (इसी प्रकार यहाँ से लेकर 'सज्जनदुर्जनानाम्' तक 'द्वन्द्व' समास है)।

व्या॰—निर्वृत्तम्=निर्+वृत्+क्त (त)। उपकार=उप+कृ+घञ् (अ), धातु की 'ऋ' को 'आर्' वृद्धि। करण=कृ+ल्युट् (यु=अन), धातु की 'ऋ' को 'अर्' गुण। स्वाभाविकम्=स्वभाव+ठक् (ठ=इक), शब्द के आदि स्वर 'अ' को 'आ' वृद्धि, अन्तिम स्वर 'अ' का लोप। व्यापादित=वि+आ+णिजन्त 'पद्' (पाद्)+इट् (इ)+क्त (त)।

शब्दार्थ :—द्विविधस्य=दो प्रकार के। निर्वृत्तम्=निष्पन्न, निष्पादित, किया या बनाया हुआ। तदर्होपकारकरणात्=तदनुकूल उपकार के करने से। नकुलसर्पाणाम्=नेवला और सर्पो का। शष्पभुङ्नखायुधानाम्=घास खाने वाले और नाखून रूपी शस्त्र वालो का। सारमेयमार्जाराणाम्=कुत्ता और बिलावो का। ईश्वरदरिद्राणाम्=अमीर और गरीबो का। सपत्नीनाम्=सौतो का। लुब्धकहरिणानाम्=बहेलियो और हरिनो का। श्रोत्रियभ्रष्टक्रियाणाम्=वेद पाठी और भ्रष्ट आचरण वालो का। कुलटा=व्यभिचारिणी।

व्यापादित =मारा, मार डाला । सतापयन्ति=सतप्त करते हैं, सताप या दुःख देते हैं ।

हि० अनु०:—कौआ बोला—'महोदय, दो प्रकार के वैर का लक्षण सुनना चाहता हूँ । सो कहिएगा ।' हिरण्यक बोला—'महोदय, किसी कारण से निष्पन्न (पैदा हुआ) कृत्रिम होता है, वह तदनुकूल उपकार के करने से समाप्त हो जाता है । किन्तु स्वाभाविक (वैर) किसी प्रकार भी समाप्त नहीं होता है । जैसे कि—नेवला और सर्पों का, घास या अन्य खाने वाले और नाखून रूपी शस्त्र वालो का, जल और अग्नि का, देव और दैत्यो का, कुत्ता और बिलावो का, अमीर और गरीबो का, सौतो का, सिंह और हाथियो का, बहेलियो और हरिनो का, वेदपाठी और भ्रष्ट आचरण वालो का, मूर्ख और पण्डितो का, पतिव्रता और व्यभिचारिणी स्त्रियों का, तथा सज्जन और दुर्जनो का (वैर कभी समाप्त नहीं होता) । (यद्यपि) किसी न कोई मार नहीं डाला है, किन्तु प्राणों को दुःख देते हैं ।' कौआ बोला—'महोदय, यह अकारण है । मेरा वचन सुनो ।

कारणान्मित्रतां याति कारणादेति शत्रुताम् ।
तस्मान्मित्रत्वमेवात्र योज्यं वैरं न धीमता ॥३४॥

अन्वय—(सब) कारणात् मित्रताम् याति कारणात् शत्रुताम् एति, तस्मात् अत्र धीमता मित्रत्वम् एव योज्यम् वैरम् न (योज्यम्) ।

स० टी०—सर्वोऽपि जन कारणात् कस्मादपि हेतो मित्रताम् मैत्रीम् याति प्राप्नोति, कारणाद् हेतोरेव शत्रुताम् वैरम् एति प्राप्नोति । तस्मादत एव अत्र जगति धीमता बुद्धिमता मित्रत्वम् सखित्वम् एव योज्यम् योजनीय करणीयमित्यर्थं, वैरम् शात्रवम् न योज्यम् करणीयम् ।

व्या०—धीमता=धी+मतुप् (मत) । योज्यम्=युज्+ण्यत् (य), धातु की उपधा 'उ' को 'ओ' गुण ।

शब्दार्थ—धीमता=बुद्धिमान् के द्वारा ।

हि० अ०—सब कोई किसी कारण से ही मित्रता प्राप्त करता है और

कारण से ही शत्रुता प्राप्त करता है। अत: इस जगत् मे बुद्धिमान् को मित्रता ही जोडनी चाहिए। वैर नही जोडना चाहिए।

तस्मात् कुरु मया सह समागमं मित्रधर्मार्थम्।' हिरण्यक आह—'भोः', श्रूयतां नीतिसर्वस्वम्।

हि० अनु०:—इसलिए मित्रता के लिए मेरे साथ मिलन करो।' हिरण्यक बोला'—भाई, नीति का सार सुनो।

सकृद्दुष्टमपीष्टं यः पुनः संधितुमिच्छति।
स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा ॥३५॥

अन्वयः—यः सकृत् दुष्टम् इष्टम् अपि पुनः संधितुम् इच्छति, स मृत्युम् उपगृह्णाति यथा अश्वतरी गर्भम्।

स० टी०:—यःसकृद् एकदा दुष्टम् दोषयुक्तम् अपि इष्टम् अनुकूलम् पुनः संधितुम् समागन्तुम् इच्छति अभिलपति, स मृत्युम् मरणम् उपगृह्णाति वृणोति यथा अश्वतरी अश्वतरेण गर्भधात्रा सह संगमेन गर्भं गृहीत्वा मृत्युम् प्राप्नोति।

शब्दार्थः—अश्वतरी=खिच्चरी।

हि० अनु०:—जो एक बार दुष्ट हो चुकने वाले इष्ट (मन चाहे) से भी पुनः मिलने की इच्छा रखता है, वह मृत्यु को प्राप्त करता है, जिस प्रकार खिच्चरी गर्भधाता खिच्चर के साथ समागम करने से गर्भधारण कर मृत्यु को प्राप्त होती है।

अथवा गुणवानहम्। न मे कश्चिद् वैरयातना करिष्यति। एतदपि न संभाव्यम्। उक्तं च—

शब्दार्थः—वैरयातनाम्=वैर निभाने को, वैर के अनुकूल पीडा को। संभाव्यम्=संभावना करनी चाहिए।

हि० अनु०:—इसके अलावा, मैं गुणवान् हूँ, मुझ से कोई वैर नहीं निभाएगा, या वैर करके मुझे पीडा नही देगा, ऐसी भी सभावना नही करनी चाहिए। कहा भी है—

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः,
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनम् ।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्,
अज्ञानावृतचेतसामतिरुषां कोऽर्थः तिरश्चां गुणैः ॥३६॥

अन्वयः—सिंह व्याकरणस्य कर्तुः पाणिनेः प्रियान् प्राणान् अहरत् अथ हस्ती मीमांसाकृतम् जैमिनिम् सहसा उन्ममाथ, मकरः छन्दोज्ञाननिधिम् पिङ्गलम् वेलातटे जघान, अज्ञानावृतचेतसाम् अतिरुषाम् तिरश्चाम् गुणैः कः अर्थः ।

स० टी० —सिंह मृगेन्द्र व्याकरणस्य शब्दशास्त्रस्य कर्तुः प्रणेतुः पाणिनेः तन्नामकस्य मुनेः प्रियान् इष्टान् प्राणान् अहरत् हृतवान्, अथ च हस्ती गजः मीमांसाकृतम् मीमांसाशास्त्रकारम् जैमिनिम् मुनिम् सहसा हेलया एव उन्ममाथ हिंसितवान्, मकरः नक्रः छन्दोज्ञाननिधिम् छन्दःशास्त्रज्ञानसागरम् पिङ्गलम् तदाख्य मुनिम् जघान हृतवान्, अज्ञानावृतचेतसाम् अज्ञानातिरोहितविवेकानाम् अतिरुषाम् अतिकोपयुक्तानाम् तिरश्चाम् पशुपक्षिणाम् गुणैः अहताभिः कः अर्थः प्रयोजनम् ।

समास —मीमांसाकृतम्=मीमांसाम् करोति (उपपदतत्पु०) । छन्दोज्ञाननिधिम्=छन्दसः ज्ञानम् (तत्पु०), तस्य निधिः तम् (तत्पु०) । अज्ञानावृतचेतसाम् =अज्ञानेन आवृतम् चेतः येषां तेषाम् (बहु०) ।

व्या० —कर्तुः=कृ+तृच् (तृ) मीमांसाकृतम्=मीमांसा+कृ+क्विप् (×)+तुक् (त्) जघान='हन्' धातु, लिट्, प्र० पु०, एक० ।

शब्दार्थ —अहरत्=ले लिया । मीमांसाकृतम्=मीमांसा-सूत्रों के प्रणेता । उन्ममाथ=मार डाला । जघान=मार दिया । अज्ञानावृतचेतसाम्=अज्ञान से घिरे हुए चित्त वालों का । तिरश्चाम्=पशु पक्षियों का ।

हि० अनु०:—सिंह ने व्याकरण-सूत्रों के प्रणेता पाणिनि मुनि के प्रिय प्राणों को ले लिया, और हाथी ने मीमांसासूत्रकार जैमिनि मुनि को एकदम मार डाला । मगर ने छन्दशास्त्र के ज्ञान के सागर पिङ्गल मुनि को समुद्र के तट पर मार डाला, (तो फिर) अज्ञान से तिरोहित विवेक वाले एवं अत्यन्त

क्रोध करने वाले पशुपक्षियो के गुणो से क्या लाभ या प्रयोजन है ?
वायस आह—'अस्त्येतत् । तथापि श्रूयताम्—

हि० अनु० —कौआ बोला—'ऐसा तो है, फिर भी सुनो—

उपकाराच्च लोकाना निमित्तान्मृगपक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणा मैत्री स्याद्दर्शनात्सताम् ॥३७॥

अन्वय.—लोकानाम् उपकारात्, मृगपक्षिणाम् च निमित्तात् मूर्खाणाम् भयात् च, सताम् दर्शनात् मैत्री स्यात् ।[1]

हि० अनु० —सर्वसाधारणजनो की परस्पर उपकार से पशु पक्षियो की किसी कारण विशेष से, मूर्खों की भय और लोभ से तथा सज्जनो की दर्शन से ही मित्रता हो जाती है ।

मृद्घट इव सुखभेद्यो दु सधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघट इव दुर्भेद सुकरसन्धिश्च ॥३८॥

अन्वय —दुर्जन. मृद्घट इव सुख भेद्य दु सन्धान च भवति, सुजन तु कनकघट इव दुर्भेद सुकरसन्धि च भवति ।

समास —मृद्घट =मृद घट (तत्पु०) । सुखभेद्य =सुखेन भेद्य (तत्पु०) । दु सन्धान =दु खेन सधातु शक्य (उपपदतत्पु०) । कनकघट =कनकस्य घट (तत्पु०) । दुर्भेद =दु खेन भेत्तु शक्य (उपपदतत्पु०) । सुकरसन्धि =सुकर सन्धि यस्य यस्मिन् वा (बहु०) ।

व्या०—भेद्य =भिद्+ण्यत् (य) । दु सधान =दुस्+सम्+धा+युच् (यु=अन) । दुर्भेद =दुस्+भिद्+खल् (अ) ।

शब्दार्थ —सुखभेद्य =सुख या सरलता स फोडने योग्य । दु सधान =

१—अब तक पूर्ववर्ती श्लोको की जो सस्कृत टीका दी गई है उससे ऐसी टीका लिखने का अनुभव हो चुका होगा, अत अब आगे प्रत्येक श्लोक की सस्कृत टीका न देकर केवल विशिष्ट एव अपेक्षाकृत कठिन श्लोको की ही सस्कृत-टीका दी जावेगी ।

जो दु ख या कठिनता से जोडा जा सके। दुर्भेद:=जो दु ख से फोडा जा सके। सुकरसन्धि =जो सरलता से जोडा जा सके।

हि० अनु० —दुष्ट मिट्टी के घडे के समान सुख से अलग हो जाता है तथा कठिनता से जोडा जा सकता है किन्तु सज्जन सोने के घडे के समान कठिनता से अलग होता है तथा सरलता से जोडा जा सकता है। (दुष्टो की मित्रता कठिनता से होती है और शीघ्र ही टूट जाती है, सज्जनो की मित्रता सरलता से हो जाती है तथा कठिनता से टूटती है)।

इक्षोरग्रात् क्रमश. पर्वणि पर्वणि यथा रसविशेषः।
तद्वत् सज्जनमैत्री विपरीतानां तु विपरीता ॥३९॥

अन्वय —यथा इक्षो अग्रात् क्रमश पर्वणि रसविशेष, तद्वत् सज्जनमैत्री (भवति), विपरीतानाम् तु विपरीता (भवति)

समास — रसविशेष =रसस्य विशेष (तत्पु०)। सज्जनमैत्री=सज्जनानाम् मैत्री (तत्पु)।

शब्दार्थ —रसविशेष =रस की अधिकता। पर्वणि=गाँठ मे।

हि० अनु० —जिस प्रकार गन्ने के अग्रभाग से (नीचे की ओर) क्रमश. प्रत्येक गाँठ मे रस की अधिकता होती है, उसी प्रकार सज्जनो की मित्रता होती है, किन्तु विपरीत अर्थात् दुर्जनो की मित्रता विपरीत होती है, (सज्जनो की मित्रता प्रारम्भ मे कम और बाद मे क्रमश बढती जाती है, किन्तु दुर्जनो की मित्रता प्रारम्भ मे अधिक और बाद मे क्रमश कम होती जाती है)।

तथा च।

हि० अनु० —और भी।

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना,
छायेव मैत्री खलसज्जनानाम् ॥४०॥

अन्वयः—खलसज्जनानाम् मैत्री दिनस्य पूर्वार्धपरार्धभिन्ना छाया इव आरम्भगुर्वी क्रमेण क्षयिणी, पुरा लघ्वी पश्चात् च वृद्धिमती (भवति)।

स० टी०:—खलसज्जनानाम् दुर्जनसज्जनानाम् मैत्री मित्रता दिनस्य दिवसस्य पूर्वार्धपरार्धभिन्ना पूर्वभागपरभागविभक्ता छाया इव आरम्भगुर्वी प्रारम्भे अधिका पुनः क्रमेण क्रमशः क्षयिणी ह्रासयुक्ता, पुरा पूर्वम् लघ्वी अल्पीयसी पश्चाद् अनन्तरं च वृद्धिमती वृद्धियुक्ता भवतीति शेषः।

समासः—खलसज्जनानाम्=खलाश्च सज्जनाश्च तेषाम् (द्वन्द्व)। पूर्वार्धपरार्धभिन्ना=पूर्वार्धश्च परार्धश्च (द्वन्द्व), ताभ्यां भिन्ना (तत्पु०)। आरम्भगुर्वी=आरम्भे गुर्वी (तत्पु०)।

व्या०:—भिन्ना=भिद्+क्त (त)+टाप् (आ)। क्षयिणी=क्षय+इनि (इन्)+ङीप् (ई)। लघ्वी=लघु+ङीप् (ई)। वृद्धिमती=वृद्धि+मतुप् (मत्)+ङीप् (ई)।

शब्दार्थः—पूर्वार्धपरार्धभिन्ना=मध्याह्न से पहले और बाद के काल में होने वाली भिन्न-भिन्न प्रकार की। आरम्भगुर्वी=प्रारम्भ में अधिक। क्षयिणी=घटने वाली। लघ्वी=कम। वृद्धिमती=बढ़ी हुई। पुरा=पहले।

हि० अनु०:—दुर्जन और सज्जनों की मित्रता (क्रमशः) दिन के पूर्वभाग और उत्तर भाग में होने वाली भिन्न-भिन्न प्रकार की छाया के समान प्रारम्भ में अधिक और फिर क्रम से घटने वाली तथा पहले कम और बाद में बढ़ी हुई होती है।

विशेषः—दिन के पूर्वभाग (दोपहर से पहले) में छाया पहले बढ़ी हुई और बाद में क्रम से घटने वाली होती है, उसी प्रकार दुर्जनों की मैत्री प्रारम्भ में बढ़ी हुई और बाद में क्रम से घटती जाती है, दूसरी ओर दिन के उत्तर भाग (दोपहर के बाद) में छाया पहले कम और बाद में बढ़ी हुई होती है, उसी प्रकार सज्जनों की मित्रता प्रारम्भ में कम और बाद में क्रमशः बढ़ती जाती है।

शरणागतोऽहम्। उत्तरं त्वां शरणागतनिर्मितं करिष्यामि। स आह—'न मेऽस्ति ते सकाशे प्रत्ययः। उक्तं च—

हि० अनु० —सो मैं साधु हूँ। दूसरे, तुमको शपथ आदि से निर्भय कर दूँगा।' वह बोला—मुझे तेरी शपथों से विश्वास नहीं होता। कहा भी है—

शपथैः सन्धितस्यापि न विश्वासं व्रजेद्रिपोः।
श्रूयते शपथं कृत्वा वृत्रः शक्रेण सूदितः ॥४१॥

अन्वय —शपथैः सन्धितस्य अपि रिपोः विश्वासम् न व्रजेत्, श्रूयते शक्रेण शपथम् कृत्वा वृत्रः सूदितः।

व्या० —सन्धितस्य=सन्धि+इतच् (इत) शब्द की अन्तिम 'इ' का लोप। सूदित=सूद्+इट (इ)+क्त (त)।

शब्दार्थ —सूदितः=मारा।

हि० अनु० —शपथों से मिलाए हुए भी शत्रु का विश्वास न करे, सुना जाता है, इन्द्र ने शपथ खाकर भी वृत्रासुर को मार डाला।

न विश्वासं विना शत्रुर्देवानामपि सिध्यति।
विश्वासात् त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ॥४२॥

अन्वय —विश्वासम् विना देवानाम् अपि शत्रुः न सिध्यति, विश्वासात् त्रिदशेन्द्रेण दितेः गर्भः विदारितः।

समास —त्रिदशेन्द्रेण=त्रिदशानाम् इन्द्रः तेन (तत्पु०)।

व्या० —विदारितः=वि+णिजन्त 'दृ' (दार)+इट (इ)+क्त (त)।

शब्दार्थ —त्रिदशेन्द्रेण=देवों के राजा इन्द्र ने। विदारितः=फाड डाला।

हि० अनु० —विश्वास के बिना देवों का भी शत्रु काम नहीं आता, (विश्वास करने से ही वह मारा जाता है) विश्वास के कारण देवराज इन्द्र ने दिति के गर्भ को फाड डाला।

अन्यच्च—

हि० अनु० —और भी।

बृहस्पतेरपि प्राज्ञस्तस्मान्नैवात्र विश्वसेत्।
य इच्छेदात्मनो वृद्धिमायुष्यं च सुखानि च ॥४३॥

अन्वयः—तस्मात् यः प्राज्ञः आत्मनः वृद्धिम् आयुष्यम् च सुखानि च इच्छेत् (सः) । अत्र वृहस्पतेः अपि न विश्वसेत् ।

शब्दार्थ.—प्राज्ञ.=बुद्धिमान् । आयुष्यम्=दीर्घ जीवन ।

हि० अनु०:—इसलिए जो बुद्धिमान् व्यक्ति अपनी उन्नति, दीर्घ जीवन एवं सुख चाहे, उसे इस जगत् में वृहस्पति का भी विश्वास नहीं करना चाहिए ।

तथा च ।

हि० अनु०:—और भी ।

सुसूक्ष्मेणापि रन्ध्रेण प्रविश्याभ्यन्तरं रिपुः ।
नाशयेच्च शनैः पश्चात् प्लवं सलिलपूरवत् ॥४४॥

अन्वय.—रिपुः सुसूक्ष्मेण अपि रन्ध्रेण अभ्यन्तरम् प्रविश्य पश्चात् च शनैः सलिलपूरवत् प्लवम् नाशयेत् ।

समास·—सलिलपूरवत्=सलिलस्य पूरः (तत्पु०), तेन तुल्यम् (तद्धित) ।

शब्दार्थ :—सलिलपूरवत्=जल के प्रवाह के समान । प्लवम्=नाव को । रन्ध्रेण=छिद्र से, पोल से ।

हि० अनु०.—शत्रु अति सूक्ष्म छिद्र (द्वार) से भी भीतर प्रवेश कर फिर धीरे-धीरे इस प्रकार नष्ट कर देता है, जिस प्रकार जल-प्रवाह (सूक्ष्म छिद्र से प्रविष्ट हो) नौका को डुबो देता है ।

न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति ॥४५॥

अन्वय:—(सीधा है)

शब्दार्थ —अविश्वस्ते=अविश्वसनीय पर । निकृन्तति=काटता है ।

हि० अनु०:—अविश्वसनीय व्यक्ति पर विश्वास न करे, विश्वसनीय पर भी विश्वास न करे, (क्योंकि) विश्वस्त व्यक्ति से उत्पन्न भय जड़ों को भी काट देता है ।

विशेष:—कहीं कहीं 'विश्वस्तेऽपि न' के स्थान पर 'विश्वस्तेऽति' पाठ है, वहाँ 'विश्वसनीय पर अति विश्वास न करना चाहिए' ऐसा अर्थ करना होगा ।

न वध्यत ह्यविश्वस्तो दुर्बलोऽपि बलोत्कटै ।
विश्वस्ताश्चापि वध्यन्ते बलवन्तोऽपि दुर्बलै ॥४६॥

अन्वय —अविश्वस्त दुबल अपि बलोत्कटै न वध्यते हि, विश्वस्ता बलव न अपि च दुर्बलै वध्यन्ते।

समास —बलोत्कटै =बलेन उत्कटा तै (त पु०)।

व्या० —अविश्वस्त =नञ (अ)+वि+श्वस+क्त (त)। बलवन्त = बल+मतुप (मत=वत्)।

शब्दार्थ —अविश्वस्त =विश्वास कर आश्वस्त न होने वाला। विश्वस्ता =विश्वास कर आश्वस्त होने वाले। बलोत्कटै =बल से प्रचण्डो के द्वारा।

हि० अनु० —किसी का विश्वास कर आश्वस्त न होने वाला व्यक्ति दुर्बल होन पर भी बलवानो के द्वारा नहीं मारा जाता, किन्तु विश्वास कर आश्वस्त होने वाले व्यक्ति बलवान् होने पर भी दुबल जनो के द्वारा मार दिए जाते हैं।

सुकृत्य विष्णुगुप्तस्य मित्राप्तिर्भार्गवस्य च।
बृहस्पतेरविश्वासो नीतिसन्धिस्त्रिधा स्थित ॥४७॥

अन्वय —विष्णुगुप्तस्य सुकृत्यम् भार्गवस्य च मित्राप्ति, बृहस्पते अविश्वास त्रिधा नीतिसन्धि स्थित ।

समास मित्राप्ति =मित्राणाम् आप्ति (तत्पु०)। नीतिसन्धि = नीतियुक्त सन्धि (मध्यमपदलोपी तत्पु०)।

व्या० —स्थित =स्था+क्त (त), धातु के 'आ' का 'इ'।

शब्दार्थ —विष्णुगुप्तस्य=नीतिशास्त्र के प्रसिद्ध विद्वान् विष्णुगुप्त (चाणक्य) का। भार्गवस्य=नीतिशास्त्र प्रणेता शुक्र का। नीतिसन्धि = नीतियुक्त सन्धि।

हि० अनु० —विष्णुगुप्त का मत है कि सुकृत्य अर्थात् अच्छे (उपकार आदि) कार्य करना चाहिए, शुक्र का मत है कि मित्रो का संग्रह करना चाहिए,

बृहस्पति का मत है कि विश्वास नहीं करना चाहिए, इन तीन प्रकारों की नीतियुक्त सन्धि मानी गई है।

। तथा च ।

हि० अनु० —और भी।

> महताप्यर्थसारेण यो विश्वसिति शत्रुषु ।
> भार्यासु सुविरक्तासु तदन्तं तस्य जीवितम् ॥४८॥

अन्वय —यः महता अपि अर्थसारेण शत्रुषु सुविरक्तासु भार्यासु विश्वसिति, तस्य जीवितम् तदन्तमेव (भवति)।

समास—अर्थसारेण=अर्थस्य सारः तेन (तत्पु०)। तदन्तम्=स अन्तः यस्य तत् (बहु०)।

शब्दार्थ—अर्थसारेण=धन या बातों के सार या बल से। तदन्तम्=तत्पर्यन्त।

हि० अनु० —जो धन या बातों के बड़े भारी भी बल (अवलम्ब या भरोसे) से शत्रुओं और अपने से विरक्त पत्नियों का विश्वास करता है, उसका जीवन तत्पर्यन्त अर्थात् ऐसे विश्वास पर्यन्त ही रहता है (जैसे ही उसने विश्वास किया कि वैसे ही उसके जीवन का नाश हो जाता है)।

तच्छ्रुत्वा लघुपतनकोऽपि निरुत्तरश्चिन्तयामास— अहो,

बुद्धिप्रागल्भ्यमस्य नीतिविषये। अथवा एवास्योपरि मैत्री पक्षपातैः। स आह—'भो हिरण्यक,

समास—निरुत्तर=नास्ति उत्तरम् यस्य सः (बहु०)। बुद्धिप्रागल्भ्यम्=बुद्धेः प्रागल्भ्यम् (तत्पु०)। पक्षपातैः=पक्षस्य आघाताः तैः (तत्पु०)।

व्या०—प्रागल्भ्यम्=प्रगल्भ—ष्यञ् (य) शब्द के आदि स्वर 'अ' को 'आ' वृद्धि अन्तिम स्वर 'अ' का लोप।

शब्दार्थ—बुद्धिप्रागल्भ्यम्=बुद्धिचातुर्य। पक्षपातैः=पर हिलाने के द्वारा, —पर, बड़ी उत्सुकता के साथ।

हि० अनु० —यह सुनकर लघुपतनक भी निरुत्तर हो सोचने लगा—

'अहो ! इसका नीति के विषय मे कितना बुद्धिचातुर्य है ! क्यो न हो, इसीलिए तो इस से झपट कर मैत्री (करने की इच्छा होती है)।

वह बोला—'हे हिरण्यक,

सतां साप्तपदं मैत्रमित्याहुर्विबुधा जनाः।
तस्मात्त्वं मित्रतां प्राप्तो वचनं मम तच्छृणु ॥४६॥

अन्वयः—सताम् साप्तपदम् मैत्रम् (भवति) इति विबुधाः जनाः आहु', तस्मात् त्वम् मित्रताम् प्राप्त., तत् मम वचनम् शृणु।

समास.—साप्तपदम्=सप्ताना पदाना समाहारः (द्विगु) सप्तपदेन निर्वत्तम् साप्तपदम्।

व्या०:—साप्तपदम्=सप्तपद+अण् (अ), शब्द के आदि स्वर 'अ' को 'आ' वृद्धि, अन्तिम स्वर 'अ' का लोप। मैत्रम्=मित्र+अण् (अ), शब्द के आदि स्वर 'इ' को 'ए' वृद्धि, अन्तिम स्वर 'अ' का लोप।

शब्दार्थ:—साप्तपदम्=सात पैरो या डगो से होने वाला अर्थात् सात कदम साथ साथ चलने से होने वाला। मैत्रम्=मित्रता।

हि० अनु० —सज्जनो का साप्तपद अर्थात् सात कदम साथ-साथ चलने से होने वाली मित्रता होती है, ऐसा विद्वज्जन कहते हैं, इसलिए तुम (मेरे साथ) मित्रता को प्राप्त कर चुके हो, अब मेरा वचन सुनो।

'दुर्गस्थेनापि त्वया मया सह नित्यमेवालापो गुणदोषसुभाषितगोष्ठीकथाः सर्वदा कर्त्तव्याः यद्येवं न विश्वसिषि।' तच्छ्रुत्वा हिरण्यकोऽपि व्यचिन्तयद्—'विदग्धवचनोऽयं दृश्यते लघुपतनकः सत्यवाक्यश्च। तद्युक्तमनेन मैत्रीकरणम्। पर कदा=चिन्मम दुर्गे चरणपातोऽपि न कार्य.। उक्तं च—

समास.—गुणदोषसुभाषितगोष्ठीकथा=गुणाश्च दोषाश्च (द्वन्द्व), तेषाम् सुभाषितानि (तत्पु०), तेषा गोष्ठ्य. (तत्पु०), तासु कथा· (तत्पु०)। विदग्धवचन. विदग्धानि वचनानि यस्य स (बहु)। सत्यवाक्य=सत्यं वाक्यम् यस्य स· (बहु०)।

व्या०:—कार्य=कृ+ण्यत् (य), धातु की 'ऋ' को 'आर्' वृद्धि।

शब्दार्थः—आलापः=बातचीत । गुणदोषसुभाषितगोष्ठीकथाः= गुणदोषविषयक सुभाषितों (अच्छी बातों) के लिए आयोजित गोष्ठियों (बैठकों) में की जाने वाली बातें । विदग्धवचनः=चतुरतापूर्ण बातें करने वाला । चरणपातः=पैर रखना ।

हि० अनु०:—बिल में रहते हुए भी तुझे मेरे साथ सदा वार्तालाप और गुणदोषविषयक विभिन्न सुभाषितों के लिए आयोजित बैठकों में की जाने वाली बातें करनी चाहिए, यदि तुझे वैसे मेरा विश्वास नहीं है।' यह सुनकर हिरण्यक भी सोचने लगा—'यह लघुपतनक चतुरतापूर्ण बातें करने वाला और सत्यवादी दीखता है, सो इस के साथ मित्रता करना ठीक है, किन्तु कभी (इसके द्वारा) मेरे बिल में पैर नहीं रखना चाहिए। कहा भी है—

भीतभीतैः पुरा शत्रुर्मन्दं मन्दं विसर्पति ।
भूमौ प्रहेलया पश्चात्ज्जारहस्तोऽङ्गनास्विव ॥५०॥

अन्वय—जारहस्तः अङ्गनासु इव शत्रुः पुरा भीतभीतैः मन्दम् विसर्पति, पश्चात् भूमौ प्रहेलया (विसर्पति) ।

समासः—भीतभीतैः=भीतानि च भीतानि च तैः (वीप्सा में द्वन्द्व) । जारहस्तः=जारस्य हस्तः (तत्पु०) ।

शब्दार्थः—भीतभीतैः=डरते-डरते । विसर्पति=सरकता है । जारहस्त=उपपति (यार) का हाथ । प्रहेलया=एक दम जोर से ।

हि० अनु०.—जिस प्रकार उपपति का हाथ स्त्रियों के विषय में (व्यवहार करता है), उसी प्रकार शत्रु पहले तो डरते-डरते धीरे-धीरे आता है और फिर भूमि पर एक दम जोर से (झपटता है) ।

तच्छ्रुत्वा वायस आह—'भद्र, एवं भवतु ।'

हि० अनु:—यह सुनकर कौआ बोला—अच्छा भाई, ऐसा ही सही ।

ततः प्रभृति द्वौ तावपि सुभाषितगोष्ठीसुखमनुभवन्तौ तिष्ठतः । परस्पर कृतोपकारौ कालं नयतः । लघुपतनकोऽपि मांसशकलानि मेध्यानि

बलिशेषाण्यन्यानि वात्सल्याहृतानि पक्वान्नविशेषाणि हिरण्यकार्थमानयति। हिरण्यकोऽपि तण्डुलानन्यांश्च भक्ष्यविशेषांल्लघुपतनकाय रात्रावाहृत्य तत्कालायातस्यार्पयति। अथवा युज्यते द्वयोरप्येतत्। उक्तं च—

समास—सुभाषितगोष्ठीसुखम्=सुभाषितानां गोष्ठ्यः (तत्पु०), तासाम् सुखम् (तत्पु०)। कृतोपकारौ—कृत उपकार याभ्याम् तौ (बहु०)। मांसशकलानि=मांसस्य शकलानि (तत्पु०)। बलिशेषाणि=बले शेषाणि (तत्पु०)। वात्सल्याहृतानि=वात्सल्येन आहृतानि (तत्पु०)। पक्वान्नविशेषाणि=पक्वानि च तानि अन्नानि (कर्मधा०), तेषाम् विशेषाणि (तत्पु०)।

रूप—अनुभवन्तौ=अनु+भू+शतृ (अत्)। आहृत=आ+हृ+क्त (त)। आहृत्य=आ+हृ+तुक् (त्)=क्त्वा (ल्यप्=य)। आयातस्य=आ+या+क्त (त)।

शब्दार्थ—सुभाषितगोष्ठीसुखम्=सुभाषितों के लिए आयोजित बैठकों का सुख। अनुभवन्तौ=अनुभव करते हुए, भोगते हुए। मांसशकलानि=मांस के टुकडों को। मेध्यानि=पवित्र पदार्थों को। बलिशेषाणि=बलि अर्थात् किसी पूजाकर्म से बचे हुए। वात्सल्याहृतानि=स्नेह के कारण लाए हुए। तत्कालायातस्य=उस समय आए हुए को।

हि० अनु०—तब से लेकर वे दोनों ही सुभाषित गोष्ठियों का सुख अनुभव करते हुए रहने लगे। परस्पर उपकार करते हुए समय व्यतीत करते थे। लघुपतनक भी मांस के टुकडों, किसी पूजा-कर्म से बचे हुए पवित्र पदार्थों, तथा अन्य भी स्नेहभाव के कारण लाए हुए विशिष्ट पक्वान्नों को हिरण्यक के लिए लाता था। हिरण्यक भी चावल तथा अन्य विशिष्ट भक्ष्य पदार्थों को लघुपतनक के लिए रात में लाकर उस समय (प्रातःकाल) आए हुए उसको देता था। दोनों का यह (व्यवहार) ठीक ही है। कहा भी है—

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥५१॥

अन्वय—(सीधा है)।

शब्दार्थ —गुह्यम्=गुप्त बात, रहस्य । आख्याति=कहता है ।

हि० अनु० —देता तथा लेता है, गुप्त बात कहता तथा पूछता है । और खाता तथा खिलाता है, ये छह प्रकार के प्रीति के लक्षण (स्वरूप या चिह्न) हैं ।

नोपकार विना प्रीतिः कथञ्चित्कस्यचिद् भवेत् ।
उपयाचितदानेन यतो देवा अभीष्टदा ॥५२॥

अन्वय —उपकारम् विना कथञ्चित् कस्यचित् प्रीतिः न भवेत्, यतः उपयाचितदानेन देवा अभीष्टदा (भवन्ति) ।

समास —उपयाचितदानेन=उपयाचितस्य दानम् तेन (तत्पु०) ।

व्या० —अभीष्टदाः=अभीष्ट+दा+क (अ), धातु के 'आ' का लोप ।

शब्दार्थ —उपयाचितदानेन=अभीष्ट के दान से ।

हि० अनु० —उपकार के बिना किसी प्रकार किसी की प्रीति न हो सकती है, क्योंकि (देवों को) अभीष्ट का दान करने से देव भी (अपने भक्त को) अभीष्ट का दान करते हैं ।

तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते ।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥५३॥

अन्वय —(सीधा है) ।

हि० अनु० —लोक में तब तक प्रीति होती है, जब तक दान दिया जाता है, बछड़ा दूध की समाप्ति देखकर माता को छोड़ देता है ।

विशेष —यहाँ 'दृष्टान्त' अलंकार है ।

पश्य दानस्य माहात्म्यं सद्यः प्रत्ययकारकम् ।
यत्प्रभावादपि द्वेषी मित्रतां याति तत्क्षणात् ॥५४॥

अन्वय —सद्यः प्रत्ययकारकम् दानस्य महात्म्यम् पश्य, यत्प्रभावात् द्वेषी अपि तत्क्षणात् मित्रताम् याति ।

समास —प्रत्ययकारकम्=प्रत्ययस्य कारकम् (तत्पु०) । यत्प्रभावात्=यस्य प्रभावः तस्मात् (तत्पु०) ।

व्या:०—कारकम्=कृ+ण्वुल् (वु=अक)। द्वेषी=द्वेष+इनि (इन्)।

शब्दार्थ—माहात्म्यम्=महिमा को। सद्य.=शीघ्र ही। प्रत्ययकारकम्=प्रतीति परिचय या विश्वास कराने वाले को। द्वेषी=द्वेष करने वाला।

हि० अनु०:—शीघ्र विश्वास कराने वाले दान के महात्म्य (महिमा) को देखो, जिसके प्रभाव से द्वेष करने वाला भी तत्क्षण मित्र हो जाता है।

पुत्रादपि प्रियतरं खलु तेन दानम्,
मन्ये पशोरपि विवेकविवर्जितस्य।
दत्ते खले नु निखिलं खलु येन दुग्धम्,
नित्यं ददाति महिषी ससुतापि पश्य ॥५५॥

अन्वयः—पश्य, येन ससुता अपि महिषी खले दत्ते निखिलम् दुग्धम् नित्यम् ददाति, तेन विवेकविवर्जितस्य पशोः अपि दानम् पुत्राद् अपि प्रियतरम् मन्ये।

सं० टी०:—पश्य अवलोकय, येन यस्माद् हेतोः ससुता सवत्सा अपि महिषी खले तैलनिष्कासनानन्तरम् अवशिष्टे तदाख्ये तुषे दत्ते समर्पिते निखिलम् सम्पूर्णम् दुग्धम् क्षीरम् ददाति, तेन तस्माद् हेतोः विवेकविवर्जितस्य ज्ञानरहितस्य पशोः अपि दानम् प्राप्तिः पुत्रात् सुताद् अपि प्रियतरम् अभीष्टतरम् (इति अहम्) मन्ये।

समासः—विवेकविवर्जितस्य=विवेकेन विवर्जितः तस्य (तत्पु०)। ससुता=सुतेन सहिता (तत्पु०)।

व्या०:—दत्ते=दा+क्त (त), 'दा' को 'दथ्' (दत्) आदेश। प्रियतरम्=प्रिय+तरप् (तर)। मन्ये='मन्' धातु, लट्, उ० पु०, एक०।

शब्दार्थ—महिषी=भैंस। खले=खल (तेल निकालने के बाद बचा हुआ पशुओं का खाद्य पदार्थ) के। विवेकविवर्जितस्य=विवेकहीन को। येन=जिससे, चूँकि। तेन=इसलिए।

हि० अनु०:—देखो, चूँकि बछड़ा रखती हुई भी भैंस खल मिलने पर सम्पूर्ण दूध रोज दे देती है, इसलिए मैं मानता हूँ कि विवेकहीन पशु को भी

दान (दान का मिलना) पुत्र से भी अधिक प्रिय है (क्योंकि भैंस खल का दान मिलने से बछड़े को छोड़कर दान देने वाले को दूध दे देती है)।

किं बहुना।

हि० अनु०:—अधिक क्या ?

प्रीतिं निरन्तरां कृत्वा दुर्भेद्यां नखमांसवत्।
मूषको वायसश्चैव गतौ कृत्रिममित्रताम्॥५६॥

अन्वयः—निरन्तराम् नखमांसवत् दुर्भेद्याम् प्रीतिम् कृत्वा मूषकः वायसः च एव कृत्रिममित्रताम् गतौ।

समासः—निरन्तराम्=नास्ति अन्तरम् यस्याम् ताम् (बहु०)। नखमांसवत्=नखश्च मांसं च (द्वन्द्व), ताभ्याम् तुल्यम् (तद्धित)। कृत्रिम-मित्रताम्=कृत्रिमा च असौ मित्रता ताम् (कर्मधा०)।

व्याः—दुर्भेद्याम्=दुस्+भिद्+ण्यत् (य) गतौ=गम्+क्त (त)।

शब्दार्थ—निरन्तराम्=व्यवधान या बाधा से रहित, निर्बाध। दुर्भेद्याम्=कठिनता से टूट सकने वाली।

हि० अनु०:—व्यवधान या बाधा से रहित और नाखून और मांस के समान दुर्भेद्य प्रीति को करके चूहा और कौआ भी (सहज शत्रु होने पर भी) कृत्रिम (परोपकार कार्यों से पैदा होने वाली) मित्रता को प्राप्त हुए।

एवं स मूषकस्तदुपकाररञ्जितस्तथा विश्वस्तो यथा तस्य पक्षमध्ये प्रविष्टस्तेन सह सदैव गोष्ठीं करोति। अथान्यस्मिन्नहनि वायसोऽश्रुपूर्णनयनः समभ्येत्य सगद्गदं तमुवाच—'भद्र हिरण्यक, विरक्तिः संजाता मे साम्प्रतं देशस्यास्योपरि तदन्यत्र यास्यामि।' हिरण्यक, आह—'भद्र, किं विरक्तेः कारणम्।' स आह—'भद्र श्रूयताम्। अत्र देशे महत्यानावृष्ट्या दुर्भिक्षं संजातम्। दुर्भिक्षत्वाज्जनो बुभुक्षापीडितः कोऽपि बलिमात्रमपि न प्रयच्छति। अपरं गृहे गृहे बुभुक्षितजनैर्विहङ्गानां बन्धनाय पाशाः प्रगुणीकृताः सन्ति। अहमप्यायुःशेषतया पाशेन बद्ध उद्धरितोऽस्मि। एतद्विरक्तेः कारणम्। तेनाहं विदेशं चलित इति वाष्पमोक्षं करोमि।' हिरण्यक आह—'अथ भवान् क्व प्रस्थितः।' स आह—'अस्ति दक्षिणापथे वनगहनमध्ये महासरः। तत्र त्वत्तोऽधिकः परमसुहृद् कूर्मो

मन्थरको नाम । स च मे मत्स्यमांसखण्डानि दास्यति । तद्भक्षणात्तेन सह सुभाषितगोष्ठीसुखमनुभवन् सुखेन कालं नेष्यामि । नाहमत्र विहङ्गानां पाश बन्धनेन क्षयं द्रष्टुमिच्छामि । उक्तं च—

